# संस्कृत-वार्ता:

दिनाङ्क :-20.10.2025 प्रात: - 06:55

सर्वेभ्य: प्रियश्रोतृभ्य: दीपावलीपर्वण: कोटिश: शुभकामनाः प्रकाशपर्वोऽयं सर्वेषां कृते मंगलं भूयात्।

---------------------------------------------

## प्रधानमन्त्री स्वदेशी

प्रधानमन्त्रिणा नरेन्द्रमोदिना नागरिकान् आहूतं यत् ते उत्सवावधौ स्वदेशी-उत्पादान् क्रीत्वा चत्वारिंशदधिकैक-शत-कोटि-भारतीयानां परिश्रमस्य उत्सवम् आचरन्तु। श्रीमोदी नागरिकान् आहूतं यत् ते उत्सवेषु यत् किमपि क्रीतवन्तः तत् सामाजिकपटलेषु प्रसारयन्तु इति। अनेन अन्ये अपि तथैव कर्तुं प्रेरिताः भविष्यन्ति इति प्रधानमन्त्री अवदत्। MyGovIndia इत्यस्य एकस्य सन्देशस्य प्रत्युत्तरे, श्रीमोदी भारते निर्मितानां उत्पादानां क्रयणस्य आवश्यकतायाः उपरि बलं प्रदीय उक्तवान् यत् "गर्व से कहो ये स्वदेशी है"। आत्मनिर्भरतायाः आर्थिक-शक्तीकरणस्य च सन्देशं सुदृढीकरणाय, स्थानीय-उद्योगानां शिल्पिनां च प्रोत्साहनाय राष्ट्रव्यापी-आन्दोलनस्य मध्ये एव प्रधानमन्त्रिणः आह्वानम् आगतम्। अस्य उपक्रमस्य समर्थनं कुर्वन्, MyGovIndia इत्यनेन "सेलिब्रेट् दिवाली एण्ड एम्पावर् स्वदेशी" इत्यनेन शीर्षकेन विशेषाभियानम् समारब्धम्, येन नागरिकाः अस्मिन् उत्सवे केवलं स्वदेशी-उत्पादान् एव क्रेतुं प्रतिज्ञां स्वीकर्तुं आमन्त्रिताः।

---------------------------------------------

## बिहार विधानसभा

बिहारराज्ये विधानसभानिर्वाचनस्य द्वितीय चरणस्य कृते नामाङ्कन प्रक्रिया अद्य समाप्यते। अस्मिन् चरणे आहत्य त्रिचत्वारिन्शदधिक द्वि शतासनेषु द्वाविंशत्यधिकैकशत निर्वाचनक्षेत्रेषु नवम्बर एकादश दिनाङ्के मतदानं भविष्यति। सहैव अद्य विधानसभानिर्वाचनस्य प्रथमस्य चरणस्य नामांकन प्रत्यावर्तनस्य अन्तिमातिथिः अपि अस्ति। अष्टादश मण्डलानाम्

एकविंशत्यधिकैकशत निर्वाचनक्षेत्रेषु प्रथम-चरणे नवम्बर षट् दिनाङ्के मतदानं भविष्यति। नवम्बर्-मासस्य चतुर्दश दिनाङ्के मतानां गणना भविष्यति।

-----------------------------------------

## दीपावली

अशेषे हि देशे अद्य दीपावली इति प्रकाशपर्व हर्षोल्लासेन सश्रद्धं च आमान्यते। अवधेयास्पदं अस्ति यत् भगवत: श्रीरामस्य अयोध्यां प्रत्यागमनावसरे इदं पर्व आमान्यते। अस्मिन् पर्वणि देव्याः लक्ष्म्या: पूजनमपि विधीयते। अशेषे हि भारते मन्दिराणि भवनानि च विद्युतदीपै: मृद्दीपैश्च प्रकाशमानानि सन्ति।

राष्ट्रपतिः द्रौपदी मुर्मुः, उपराष्ट्रपतिः सी. पी. राधाकृष्णन् वर्यः च दीपावल्यावसरे राष्ट्राय शुभकामनाः प्रदत्तवन्तौ। स्वसन्देशे राष्ट्रपतिः मुर्मुः अवदत् यत् दीपावली भारतस्य लोकप्रियेषु उत्सवेषु अन्यतमः अस्ति। सा अवोचत् यत् अयं उत्सवः अन्धकारस्य उपरि प्रकाशस्य, अज्ञानस्य उपरि ज्ञानस्य, अशुभस्य उपरि शुभस्य च विजयस्य प्रतीकः अस्ति इति।

लोकसभायाः अध्यक्षः ओम् बिरला वर्यः दीपावल्यावसरे देशवासिनां कृते शुभाशयाः प्रेषितवान्। सः गोवर्धन-पूजा, भाई-दूज इत्यादीनां आगामि-उत्सवानां कृते अपि शुभकामनाः प्रदत्तवान्।

-----------------------------------------

## अयोध्या

अयोध्यायां ह्य: सायम् आयोजिते दीपोत्सव-समारोहे षड्विंशति-लक्षसंख्याका: मृद्दीपा: प्रज्वाल्य गिनीस-वर्ल्ड-रिकार्ड इत्यस्मिन् वैश्विक-कीर्तिमानं संस्थापितम्। दीपोत्सव-समारोह: अनवरतं नववर्षेभ्य: आयोज्यते। ऐषम: दीपोत्सवस्य आकार: स्तरश्च विवर्धितो जात:। नगरस्य विभिन्नभागेषु अन्यघट्टेषु मृद्दीपा: प्रज्वालिता:। सम्पूर्णमपि अयोध्यानगरं दीपै: जाज्वल्यमानं जातम्।

-----------------------------------------

## रेलमन्त्री आनन्द विहार

रेलमन्त्री अश्विनी वैष्णवः रेलविभागस्य अधिकारिभिः सह गतरात्रौ आनन्द-विहार-रेलस्थानकं गत्वा दीपावलि-छठ्-उत्सवानां च दृष्ट्या यात्रिणां कृते कृतानां व्यवस्थायाः अवलोकनं कृतवान्। भ्रमणकाले सः यात्रिभिः सहापि वार्तालापं कृत्वा व्यवस्थायाः विषये तेषां प्रतिक्रियां पृष्टवान्।

------------------------------------------

**कुराश क्रीडा**

पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य एशियन्-यूथ्-गेम्स्-क्रीडायां, भारतस्य पञ्चदश वर्षीया खुशी इत्यनया बहरीन्-देशे देशस्य कृते ह्यः कुराश्-क्रीडायां कांस्यपदकं विजितवती।

।।इति वार्ता:।।